# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय १५

ततस्तान्विद्रुतान्दृष्ट्वा यक्षाञ्शतसहस्रशः ।
स्वयमेव धनाध्यक्षो निर्जगाम रणं प्रति ॥ १ ॥

तत्र माणिचारो नाम यक्षः परमदुर्जयः ।
वृतो यक्षसहस्रैः स चतुर्भिः समयोधयत् ॥ २ ॥

ते गदामुसलप्रासशक्तितोमरमुद्गरैः ।
अभिघ्नन्तो रणे यक्षा राक्षसानभिदुद्रुवुः ॥ ३ ॥

ततः प्रहस्तेन तदा सहस्रं निहतं रणे ।
महोदरेण गदया सहस्रमपरं हतम् ॥ ४ ॥

क्रुद्धेन च तदा राम मारीचेन दुरात्मना ।
निमेषान्तरमात्रेण द्वे सहस्रे निपातिते ॥ ५ ॥

धूम्राक्षेण समागम्य माणिभद्रो महारणे ।
मुसलेनोरसि क्रोधात्ताडितो न च कम्पितः ॥ ६ ॥

ततो गदां समाविध्य माणिभद्रेण राक्षसः ।
धूम्राक्षस्ताडितो मूर्ध्नि विह्वलो निपपात ह ॥ ७ ॥

धूम्राक्षं ताडितं दृष्ट्वा पतितं शोणितोक्षितम् ।
अभ्यधावत्सुसङ्क्रुद्धो माणिभद्रं दशाननः ॥ ८ ॥

तं क्रुद्धमभिधावन्तं युगान्ताग्निमिवोत्थितम् ।
शक्तिभिस्ताडयामास तिसृभिर्यमपुङ्गवः ॥ ९ ॥

ततो राक्षसराजेन ताडितो गदया रणे ।
तस्य तेन प्रहारेण मुकुटः पार्श्वमागतः ।
तदा प्रभृति यक्षोऽसौ पार्श्वमौलिरिति स्मृतः ॥ १० ॥

तस्मिंस्तु विमुखे यक्षे माणिभद्रे महात्मनि ।
संनादः सुमहान्नाम तस्मिञ्शैले व्यवर्धत ॥ ११ ॥

ततो दूरात्प्रददृशे धनाध्यक्षो गदाधरः ।
शुक्रप्रोष्टःपदाभ्यां च शङ्खपद्मसमावृतः ॥ १२ ॥

स दृष्ट्वा भ्रातरं सङ्ख्ये शापाद्विभ्रष्टगौरवम् ।
उवाच वचनं धीमान्युक्तं पैतामये कुले ॥ १३ ॥

मया त्वं वीर्यमाणोऽपि नावगच्छसि दुर्मते ।
पश्चादस्य फलं प्राप्य ज्ञास्यसे निरयं गतः ॥ १४ ॥

यो हि मोहाद्विषं पीत्वा नावगच्छति मानवः ।
परिणामे स वि मूढो जानीते कर्मणः फलम् ॥ १५ ॥

दैवतानि हि नन्दन्ति धर्मयुक्तेन केन चित् ।
येन त्वमीदृशं भावं नीतस्तच्च न बुध्यसे ॥ १६ ॥

यो हि मातॄह्पितॄन्भ्रातॄनाचर्यांश्चावमन्यते ।
स पश्यति फलं तस्य प्रेतराजवशं गतः ॥ १७ ॥

अध्रुवे हि शरीरे यो न करोति तपोऽर्जनम् ।
स पश्चात्तप्यते मूढो मृतो दृष्ट्वात्मनो गतिम् ॥ १८ ॥

कस्य चिन्न हि दुर्बुधेश्छन्दतो जायते मतिम् ।
यादृशं कुरुते कर्म तादृशं फलमश्नुते ॥ १९ ॥

बुद्धिं रूपं बलं वित्तं पुत्रान्माहात्म्यमेव च ।
प्रप्नुवन्ति नराः सर्वं स्वकृतैः पूर्वकर्मभिः ॥ २० ॥

एवं निरयगामी त्वं यस्य ते मतिरीदृशी ।
न त्वां समभिभाषिष्ये दुर्वृत्तस्यैष निर्णयः ॥ २१ ॥

एवमुक्त्वा ततस्तेन तस्यामात्याः समाहताः ।
मारीचप्रमुखाः सर्वे विमुखा विप्रदुद्रुवुः ॥ २२ ॥

ततस्तेन दशग्रीवो यक्षेन्द्रेण महात्मना ।
गदयाभिहतो मूर्ध्नि न च स्थानाद्व्यकम्पत ॥ २३ ॥

ततस्तौ राम निघ्नन्तावन्योन्यं परमाहवे ।
न विह्वलौ न च श्रान्तौ बभूवतुरमर्षणौः ॥ २४ ॥

आग्नेयमस्त्रं स ततो मुमोच धनदो रणे ।
वारुणेन दशग्रीवस्तदस्त्रं प्रत्यवारयत् ॥ २५ ॥

ततो मायां प्रविष्टः स राक्षसीं राक्षसेश्वरः ।

जघान मूर्ध्नि धनदं व्याविध्य महतीं गदाम् ॥ २६॥

एवं स तेनाभिहतो विह्वलः शोणितोक्षितः ।
कृत्तमूल इवाशोको निपपात धनाधिपः ॥ २७॥

ततः पद्मादिभिस्तत्र निधिभिः स धनाधिपः ।
नन्दनं वनमानीय धनदो श्वासितस्तदा ॥ २८॥

ततो निर्जित्य तं राम धनदं राक्षसाधिपः ।
पुष्पकं तस्य जग्राह विमानं जयलक्षणम् ॥ २९॥

काञ्चनस्तम्भसंवीतं वैदूर्यमणितोरणम् ।
मुक्ताजालप्रतिच्छन्नं सर्वकामफलद्रुमम् ॥ ३०॥

तत्तु राजा समारुह्य कामगं वीर्यनिर्जितम् ।
जित्वा वैश्रवणं देवं कैलासादवरोहत ॥ ३१॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com